चौखम्बा स्तोत्र ग्रन्थमाला

६

॥ श्रीकालिकासहस्रनामस्तोत्रम् ॥

(नामावलीसहितम्)

चौखम्बा संस्कृत प्रतिष्ठान : दिल्ली

मूल्य १०.००

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ श्रीरस्तु ॥

॥ श्रीकालिकासहस्रनामस्तोत्रम् ॥

(नामावलीसहितम्)

चौखम्बा संस्कृत प्रतिष्ठान
३८ यू० ए० बंगलो रोड, जवाहरनगर
दिल्ली ११०००७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ श्रीरस्तु ॥

॥ श्रीकालिकासहस्रनामस्तोत्रम् ॥

कथितोऽयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः । यमासाद्य मया प्राप्तमैश्वर्यपद मुत्तमम् ॥ १ ॥ संयुक्तः परया भक्त्या यथोक्तविधिना भवान् । कुरुता मर्चनं देव्या त्रैलोक्य विजिगीषया ॥ २ ॥

परशुराम उवाच—

प्रसन्नो यदि मे देव परमेशः पुरातनः । रहस्यं परया देव्याः कृपया कथय. प्रभो ॥ ३ ॥ यथार्चनं विना होमं विना न्यासं विना

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

बलिम्। जिना गन्धं विना पुष्पं विना नित्योदितक्रियाम् ॥ ४ ॥ प्राणायामं विना ध्यानं विना भूतविशोधनं। विना जाप्यं विनादानं विनाकाळी प्रसीदति ॥ ५ ॥

श्रीशङ्कर उवाच—

पृष्टं त्वयोत्तमं प्राज्ञ भृगुवंशविवर्धनम्। भक्तानामपि भक्तोऽसि त्वमेवं साधयिष्यसि ॥ ६ ॥ देवीं दानवकोटिघ्नीं लीलया रुधिरप्रियाम्। सदा स्तोत्रप्रियामुग्रां कामकौतुकलालसाम् ॥ ७ ॥ सर्वदानन्दहृदयां वासव्यासक्तमानसाम्। माध्वीकमत्स्यमांसादिरागिणीं रुधिरप्रियाम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

८ ॥ श्मशानवासिनीं प्रेतगणनृत्यमहोत्सवाम् । योगप्रभां योगिनीशां योगीन्द्रहृदये स्थिताम् ॥ ९ ॥ तामुग्रकाळिकां राम प्रसादयितु मर्हसि । तस्याः स्तोत्रं महापुण्यं स्वयं काळ्या प्रकाशितम् ॥ १० ॥ तव तत्कथयिष्यामि श्रुत्वा वत्सावधारय । गोपनीयं प्रयत्नेन पठनीयं परात्परम् ॥ ११ ॥ यस्यैककालपठनात्सर्वे विघ्नाः समाकुलाः । नश्यन्ति दहने दीप्ते पतङ्गा इव सर्वतः ॥१२॥ गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत् । तस्य दर्शना मात्रेण वादिनो निष्प्रभा मताः ॥१ ॥ राजानोऽपि च दासत्वं भजन्ति च परे जनाः । तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ॥ १४ ॥ निशीथे मुक्तये शंभु र्नमः शक्तिसमन्वितः। मनसा चिन्तयेत्काळीं महाकालीति लालिताम् ॥ १५ ॥ पठेत्सहस्र-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नामाख्यं स्तोत्रं मोक्षस्य साधनम् । प्रसन्ना कालिका तस्य पुत्रत्वे-
नानुकम्पते ॥ १६ ॥ वेधा ब्रह्मास्मृते ब्रह्म कुसुमैः पूजिता पुरी ।
प्रसीदति तथा काली यथानेन प्रसीदति ॥ १७ ॥

अस्य सहस्रनामस्तोत्रस्य महाकालभैरवऋषिः अनुष्टुप्छन्दः
श्मशानकालिका देवता प्रसादसिध्यर्थे जपे विनियोगः ॥

ओं ॥ श्मशानकालिका काली भद्रकाली कपालिनी । गुह्यकाली
महाकाली कुरुकुल्या विरोधिनी ॥ १८ ॥ कालिका कालरात्रिश्च
महाकालनितम्बिनी । कालभैरवभार्या च कुलवर्त्मप्रकाशिनी ॥ १९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कामदा कामिनी काम्या कामनीयसुभाविनी । कस्तूरी रसनीलाङ्गी
कुञ्जरेश्वरगामिनी ॥ २० ॥ ककारवर्णसर्वाङ्गी कामिनी कामसुन्दरी ।
कामार्ता कामरूप च कामधेनुः कलावती ॥ २१ ॥ कान्ता कामस्वरूपा
च कामाख्या कुलपालिनी । कुलीना कुलवत्यम्बा दुर्गा दुर्गार्ति-
नाशिनी ॥ २२ ॥ कौमारी कुलजा कृष्णा कृष्णदेहा कृशोदरी ।
कृशाङ्गी कुलिशाङ्गी च क्रींकारी कमला कला ॥ २३ ॥ करालास्या
कराली च कुलकांताऽपराजिता । उग्रा चोग्रप्रभा दीप्ता विप्रचित्ता
महाबला ॥ २४ ॥ नीला घना बलाका च मात्रामुद्रापिताऽसिता ।
ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्सला ॥ २५ ॥ माहेश्वरी च
चामुण्डा वाराही नारसिंहिका । वज्राङ्गी वज्रकंकाली नृमुण्डमालिनी

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शिवा ॥ २६ ॥ मालिनी नरमुण्डाली गलद्रक्तविभूषणा । रक्तचन्दन-
सिक्ताङ्गी सिन्दूरारुणमस्तका ॥ २७ ॥ घोररूपा घारेदंष्ट्रा
घोराघोरतरा शुभा । महादंष्ट्रा महामाया सुदती युगदन्तुरा
॥ २८ ॥ सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना । शारदेन्दु
प्रसन्नास्या स्फुरत्स्मेरांबुजेक्षणा ॥ २९ ॥ अट्टहास
प्रसन्नास्या स्मेरवक्त्रा सुभाषिणी । प्रसन्नपद्मवदनास्मितास्याप्रिय-
भाषिणी ॥ ३० ॥ कोटराक्षी कुलश्रेष्ठा महती बहुभाषिणी । सुमतिः
कुमतिः प्रचण्डा चण्डमुंडातिवेगिनी ॥ प्रचण्डा चण्डिकाचण्डी चर्चिका

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चण्डवेगिनी। सुकेशी मुक्तकेशी च दीर्घकेशी महत्कचा ॥ प्रेतदेहा कर्णपूरा प्रेतप्राणिसुमेखला। प्रेतासना प्रियप्रेता प्रेतभूमिकृतालया ॥ ३३ ॥ श्मशानवासिनी पुण्या पुण्यदा कुलपण्डिता । पुण्यालया पुण्यदेहा पुण्यश्लोकी च पावनी ॥ ३४ ॥ पुत्रा पवित्रा परमा पुरा पुण्य-विभूषणा । पुण्यनाम्नी भीतिहरा वरदा खड्गपाणिनी ॥ ३५ ॥ नृमुण्डहस्तशस्ता च छिन्नमस्ता सुनासिका । दक्षिणा श्यामला श्यामा शान्ता पीनोन्नतस्तनी ॥ ३६ ॥ दिगंबरा घोररावा सृक्कान्ता रक्तवाहिनी। घोररावा शिवा खड्गा विशङ्का मदनातुरा॥३७ ॥मत्ता प्रमत्ता प्रमदा सुधासिन्धुनिवासिनी । अतिमत्ता महामत्ता सर्वाकर्षण-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कारिणी ॥ ३८ ॥ गीतप्रिया वाद्यरता प्रेतनृत्यपरायणा । चतुर्भुजा दशभुजा अष्टादशभुजा तथा ॥ ३९ ॥ कात्यायनी जगन्माता जगती परमेश्वरी । जगद्बन्धु र्जगद्धात्री जगदानन्दकारिणी ॥ ४० ॥ जगन्मयी हैमवती महामाया महामहा । नागयज्ञोपवीताङ्गी नागिनी नागशायिनी ॥ ४१ ॥ नागकन्या देवकन्या गन्धर्वी किन्नरेश्वरी । मोहरात्रि-र्महारात्रि र्दारुणा भासुरांबरा ॥ ४२ ॥ विद्याधरी वसुमती यक्षिणी योगिनी जरा । राक्षसी डाकिनी वेदमयी वेदविभूषणा ॥ ४३ ॥ श्रुतिः स्मृति र्महाविद्या गुह्यविद्या पुरातनी । चिन्त्या ऽचिन्त्या सुधा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्वाहा निद्रा तन्द्रा च पार्वती ॥ ४४ ॥ अपर्णा निश्चला लोला सर्वविद्या तपस्विनी । गङ्गा काशी शची सीता सती सत्य-परायणा ॥ ४५ ॥ नीति स्सुनीति स्सुरुचि स्तुष्टिः पुष्टि र्धृतिः क्षमा । वाणी बुद्धि र्महालक्ष्मी र्लक्ष्मीर्नीलसरस्वती ॥४६॥ स्रोतस्वती सरस्वती मातङ्गी विजया जया । नदी सिन्धुः सर्वमयी तारा शून्यनिवासिनी ॥ ४७ ॥ शुद्धा तरङ्गिणी मेधा लाकिनी बहुरूपिणी । स्थूला सूक्ष्मा सूक्ष्मतरा भगवत्यनुरूपिणी ॥ ४८ ॥ परमाणुस्वरूपा च चिदानन्द-स्वरूपिणी । सदानन्दमयी सत्या सर्वानन्दस्वरूपिणी ॥ ४९ ॥ सुतन्द्रा नन्दिनी स्तुत्या स्तवनीयस्वभाविनी । रङ्गिनी डङ्किनी चित्रा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विचित्रा चित्ररूपिणी ॥५०॥ पद्मा पद्मालया पद्ममुखी पद्मविभूषणा । डाकिनी शाकिनी क्षान्ता राकिनी रुधिरप्रिया ॥ ५१ ॥ भ्रान्ति-र्भवानी रुद्राणी मृडानी शत्रुमर्दिनी । उपेन्द्राणी महेन्द्राणी ज्योत्स्ना चन्द्रस्वरूपिणी ॥ ५२ ॥ सूर्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान् । शक्तिर्मुक्तिर्मतिर्माता भक्तिर्मुक्तिः पतिव्रता ॥ ५३ ॥ सर्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा । सर्वज्ञा सिद्धिदा सिद्धा भव्याभव्या भयापहा ॥ ५४ ॥ कर्त्री हर्त्री पालयित्री शर्वरी तामसी दया । तमिस्रा तामसी स्थाण्वुः स्थिरा धीरा तपस्विनी ॥ ५५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चार्वंगी चञ्चला लोलजिह्वा चारुचरित्रिणी। त्रपा त्रपावती लज्जा विलज्जा हरयौवती ॥ ५६ ॥ सत्यवती धर्मनिष्ठा श्रेष्ठा निष्ठुरवादिनी। गरिष्ठा दुष्टसंहन्त्री विशिष्टा श्रेयसी घृणा ॥ ५७ ॥ भीमा भयानका भीमनादिनी भीः प्रभावती। वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुःप्रिया ॥ ५८ ॥ ऋक्सामाथर्वनिलया रागिणी शोभना सुरा। कलकण्ठी कंबुकण्ठी वेणुवीणापरायणा ॥ ५९ ॥ वंशिनी वैष्णवी स्वच्छा धात्री त्रिजगतीश्वरी। मधुमती कुण्डलिनी ऋद्धिः शुद्धिः शुचिस्मिता ॥ ६० रंभोर्वशी रती रामा रोहिणी रेवती मघा। शङ्खिनी चक्रिणी कृष्णा गदिनी पद्मिनी तथा ॥ ६१ ॥ शूलिनी परिघास्त्रा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

च पाशिनी शारङ्गपाणिनी । पिनाकधारिणी धूम्रा सुरभी वनमा-
लिनी ॥ ६२ ॥ रथिनी समरप्रीता वेगिनी रणपण्डिता ।
जटिनी वाग्मिनी नीला लावण्यांबुदचन्द्रिका ॥ ६३ ॥ बलिप्रिया
सदा पूज्या दैत्येन्द्रमथिनी तथा । महिषासुरसंहर्त्री कामिनी रक्त-
दन्तिका ॥ ६४ ॥ रक्तपा रुधिराक्ताङ्गी रक्तखर्परधारिणी । रक्त-
प्रिया मांसरुचिर्वासवासक्तमानसा ॥ ६५ ॥ गलच्छोणितमुण्डाली
कण्ठमाला विभूषणा । शवासना चितान्तस्था माहेशी वृषवाहिनी ॥ ६६
व्याघ्रत्वगंबरा चीनचैलिनी सिंहवाहिनी । वामदेवी महादेवी गौरी

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सर्वज्ञभामिनी ॥ ६७ ॥ बालिका तरुणी वृद्धा वृद्धमाता जरातुरा ।
सुभ्रू र्विलासिनी ब्रह्मवादिनी ब्राह्मणी सती ॥ ६८ ॥ सुप्तवती
चित्रलेखा लोपामुद्रा सुरेश्वरी । अमोघाऽरुन्धती तीक्ष्णा भोगवत्यनु-
रागिणी ॥ ६९ ॥ मन्दाकिनी मन्दहासा ज्वाला मुख्यसुरान्तका ।
मानदा मानिनी मान्या माननीया मदातुरा ॥ ७० ॥ मदिरा
मेदुरान्मादा मेध्या साध्या प्रसादिनी । सुमध्यानन्तगुणिनी सर्व-
लोकोत्तमोत्तमा ॥ ७१ ॥ जयदा जित्वरी जैत्री जयश्री जयशालिनी ।
सुखदा शुभदा सत्या सभा संक्षोभकारिणी ॥ ७२ ॥ शिवदूती
भूतिमती विभूतिर्भूषणानना । कौमारी कुलजा कुन्ती कुलस्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुलपालिका ॥ ७३ ॥ कीर्तिर्यशस्विनी भूषा भूष्टा भूतिपतिप्रिया । सुगुणा निर्गुणाऽधिष्ठा निष्ठा काष्ठा प्रकाशिनी ॥ ७४ ॥ धनिष्ठा धनदा धान्या वसुधा सुप्रकाशिनी । उर्वी गुर्वी गुरुश्रेष्ठा षड्गुणा त्रिगुणात्मिका ॥ ७५ ॥ राज्ञामाज्ञा महाप्रज्ञा सुगुणा निर्गुणात्मिका । महाकुलीना निष्कामा सकामा कामजीवना ॥ ७६॥ कामदेवकला रामाऽभिरामा शिवनर्तकी । चिन्तामणिः कल्पलता जाग्रती दीनवत्सला ॥ ७७ ॥ कार्तिकी कृत्तिका कृत्या अयोध्या विषमासमा । सुमन्त्रा मन्त्रिणी घूर्णा ह्लादिनी क्लेशनाशिनी ॥ ७८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्रैलोक्यजननी हृष्टा निर्मांसामलरूपिणी । तडागनिम्नजठरा शुष्कमांसास्थिमालिनी ॥७९॥ अवन्ती मथुरा हृद्या त्रैलोक्यपावनक्षमा । व्यक्ताऽव्यक्ताऽनेकमूर्ति श्शरभी भीमनादिनी ॥ ८० ॥ क्षेमङ्करी शाङ्करी च सर्वसम्मोहकारिणी । ऊर्ध्वतेजस्विनी छिन्ना महातेजस्विनी तथा ॥ ८१ ॥ अद्वैता योगिनी पूज्या सुरभी सर्वमङ्गला । सर्व-प्रियङ्करी भोग्या धनिनी पिशिताशना ॥ ८२ ॥ भयङ्करी पापहरा निष्कलङ्का वशङ्करी । आशा तृष्णा चन्द्रकला निद्राणा वायुवेगिनी ॥ ८३ ॥ सहस्रसूर्यसङ्काशा चन्द्रकोटिसमप्रभा । निशुम्भशुम्भ-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

संहर्त्री रक्तबीजविनाशिनी ॥ ८४ ॥ मधुकैटभसंहर्त्री महिषासुर-

घातिनी । वह्निमंडलमध्यस्था सर्वसत्वप्रतिष्ठिता ॥ ८५ ॥ सर्वाचारवती सर्वदेवकन्याऽतिदेवता । दक्षकन्या दक्षयज्ञनाशिनी दुर्गतारिणी ॥ ८६ ॥ इज्या पूज्या विभा भूतिः सत्कीर्तिर्ब्रह्मचारिणी । रंभोरुश्चतुरा राका जयन्ती वरुणा कुहूः ॥ मनस्विनी देवमाता यशस्या ब्रह्मवादिनी । सिद्धिदा वृद्धिदा वृद्धिः सर्वाद्या सर्वदायिनी ॥ ८८ ॥ आधाररूपिणी ध्येया मूलाधारनिवासिनी । आज्ञा प्रज्ञा पूर्णमना श्चन्द्रमुख्यनुकूलिनी ॥ ८९ ॥ वावदूका निम्ननाभिस्सत्यसन्धा दृढव्रता । आन्वीक्षिकी दण्डनीति त्रयी त्रिदिवसुन्दरी

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ९० ॥ ज्वालिनी ज्वलिनी शैलतनया विंध्यवासिनी । प्रत्यया खेचरी धैर्या तुरीया विमलातुरा ॥ ९१ ॥ प्रगल्भा वारुणी क्षामा दर्शिनी विस्फुलिङ्गिनी । भक्तिः सिद्धिः सदाप्राप्तिः प्रकाम्या महिमा ऽणिमा ॥ ९२ ॥ ईक्षासिद्धि र्वशित्वा च ईशित्वौर्ध्वनिवासिनी । लघिमा चैव सावित्री गायत्री भुवनेश्वरी ॥ ९३ ॥ मनोहरा चिता दिव्या देव्युदारा मनोरमा । पिङ्गला कपिला जिह्वा रसज्ञा रसिका रसा ॥ ९४ ॥ सुषुम्नेडा योगवती गान्धारी नवकान्तका । पाञ्चाली रुक्मिणी राधा राध्या भीमा च राधिका ॥ ९५ अमृता

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तुलसी बृन्दा कैटभी कपटेश्वरी । उग्रचण्डेश्वरी वीरजननी

वीरसुन्दरी ॥ ९६ ॥ उग्रतारा यशोदाख्या देवकी देवमानिता । निरञ्जना चित्रदेवी क्रोधिनी कुलदीपिका ॥ ९७ ॥ कुलरागीश्वरी ज्वाला मात्रिका द्राविणी द्रवा । योगीश्वरी महामारी भ्रामरी बिन्दुरूपिणी ॥ ९८ ॥ दूती प्राणेश्वरी गुप्ता बहुला डामरी प्रभा । कुब्जिका ज्ञानिनी ज्येष्ठा भुशुण्डी पकटाकृतिः ॥ ९९ ॥ द्राविणी गोपिनी माया-कामबीजेश्वरी प्रिया । शाकम्भरी कोकनदा सुसत्या च तिलोत्तमा ॥ १ ००॥ अमयो विक्रमा क्रूरा सम्यक्छीला त्रिविक्रमा । स्वस्तिर्हव्यवहा प्रीतिरुक्भा धूम्रार्चिरङ्गदा ॥ १०१ ॥ तपिनी तापिनी

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विश्वभोगदा धारिणी धरा । त्रिखण्डा रोधिनी वश्या सकला शब्दरूपिणी ॥ १०२ ॥ बीजरूपा महामुद्रा वशिनी योगरूपिणी । अनङ्गकुसुमाऽनङ्गमेखलाऽनङ्गरूपिणी ॥ १०३ ॥ अनङ्गमदनाऽनङ्गरेखाऽनङ्गाकुशेश्वरी । अनङ्गमालिनी कामेश्वरी सर्वार्थसाधिका ॥ १०४ ॥ सर्वतन्त्रमयी सर्वमोदिन्याऽनन्दरूपिणी । व्रजेश्वरी च जयिनी सर्वदुःखक्षयङ्करी ॥ १०५ ॥ षडङ्गयुवती योगयुक्ता ज्वालांशुमालिनी । दुराशया दुराधारा दुर्जया दुर्गरूपिणी ॥ १०६ ॥ दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा । हंसेश्वरी त्रिलोकस्था

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शाकम्भर्यनुरागिणी ॥ १०७ ॥ त्रिकोणनिलया नित्या परमामृतरञ्जिता ।

महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी ॥ १०८ ॥ त्वरिता भक्तिसंयुक्ता भक्तिवश्या सनातनी । भक्तानन्दमयी भक्तभाविता भक्तशङ्करी ॥ १०९ ॥ सर्वसौन्दर्यनिलया सर्वसौभाग्यशालिनी । सर्वसंभोगभवना सर्वसौख्यानुरूपिणी ॥ ११० ॥ कुमारी पूजनरता कुमारी व्रतचारिणी । कुमारी भक्तिसुखिनी कुमारी रूपधारिणी ॥ १११ ॥ कुमारीपूजकप्रीता कुमारीप्रीतिदप्रिया । कुमारीसेवकासङ्गा कुमारीसेवकालया ॥ ११२ ॥ आनन्दभैरवी बालाभैरवी वटुभैरवी । श्मशानभैरवी कालभैरवी पुरभैरवी ॥ ११३ ॥ महाभैरवपत्नी च परमानन्द

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भैरवी। सुरानन्दभैरवी च उन्मादानन्दभैरवी ॥११४॥ यज्ञानन्दभैरवी च तथा तरुणभैरवी। ज्ञानानन्दभैरवी च अमृतानन्दभैरवी ॥ ११५॥ महाभयङ्करी तीव्रा तीव्रवेगा तरस्विनी। त्रिपुरा परमेशानी सुन्दरी रसुन्दरी ॥ ११६ ॥ त्रिपुरेशी पञ्चदशी पञ्चमी पुरवासिनी। महासप्तदशी चैव षोडशी त्रिपुरेश्वरी ॥ ११७ ॥ महाङ्कुशस्वरूपा च महाचक्रेश्वरी तथा। नवचक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी ॥११८ राजचक्रेश्वरी राज्ञी महात्रिपुरसुन्दरी। सिन्दूरपूररुचिरा श्रीमत्त्रिपुर-सुन्दरी॥ ११९। सर्वाङ्गसुन्दरी रक्ता रक्तवस्त्रोत्तरीयका। यवायावक-सिन्दूररक्तचन्दनधारिणी ॥ १२० ॥ यवायावकसिन्दूररक्तचन्दन-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रूपधृक् । चमरीवालकुटिला निर्मला श्यामकेशिनी ॥ १२१ ॥ वज्र-
मौक्तिकरत्नाढ्य किरीटकुण्डलोज्ज्वला । रत्नकुण्डलसंयुक्ता स्फुरद्गण्ड-
मनोरमा ॥ १२२ ॥ कुञ्जरेश्वरकुम्भोत्थमुक्ताराजितनासिका -
मुक्ता विद्रुममाणिक्य हीराद्यस्तनमण्डला ॥ १२३ ॥ सूर्यकान्तेन्दु-
कान्ताढ्या स्पर्शाश्मगलभूषणा । बीजपूरस्फुरद्बीजदन्तपंक्तिरनुत्तमा ॥
१२४ ॥ कामकोदण्डका भग्नभ्रूकटाक्षप्रवर्षिणी । मातङ्गकुम्भवक्षो-
जा लसत्कनकदक्षिणा ॥ १२५ ॥ मनोज्ञशष्कुली कर्णा हंसीगति
विडम्बनी । पद्मरागाङ्गदद्योतद्दोश्चतुष्कप्रकाशिनी ॥ १२६ ॥ कर्पूरा-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गरुकस्तूरीकुङ्कुमद्रवलेपिता । विचित्ररत्नपृथिवीकल्पशाखितलास्थिता
॥ १२७ ॥ रत्नदीपस्फुरद्रत्नसिंहासननिवासिनी । षट्चक्रभेदनकरी
परमानन्दरूपिणी ॥ १२८ ॥ सहस्रदळपद्मान्ता चन्द्रमण्डलवर्तिनी
ब्रह्मरूपा शिवक्रोडा नानासुखविलासिनी ॥ १२९ ॥ हरविष्णु-
विरिंचीन्द्रग्रहनायकसेविता । शिवा शैवा च रुद्राणी तथैव
शिवनादिनी ॥ १३० ॥ महादेवं प्रिया देवी तथैवानङ्गमेखला ।
डाकिनी योगिनी चैव तथोपयोगिनी मता ॥ १३१ ॥ माहेश्वरी
वैष्णवी च भ्रामरी शिवरूपिणी । अलंबुसा भोगवती क्रोधरूपा
सुमेखला ॥ १३२ ॥ गान्धारी हस्तिजिह्वा च इडाचैव शुभङ्करी ।

Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पिङ्गला दक्षसूत्री च सुषुम्ना चैव गान्धिनी ॥ १३३ ॥ भगात्मिका भगाधरा भगेशी भगरूपिणी । लिङ्गाख्या चैव कामेशी त्रिपुरा भैरवी तथा ॥ १३४ ॥ लिङ्गगीतिस्सुगीतिश्च लिङ्गस्था लिङ्गरूपधृक् । लिङ्गमाला लिङ्गभवा लिङ्गलिङ्गा च पावकी ॥ १३५ ॥ भगवती कौशिकी च प्रेमा चैव प्रियंवदा । गृध्ररूपी शिवा रूपा चक्रेशी चक्ररूपधृक् ॥ १३६ ॥ आत्मयोनि ब्रह्मयोनि जगद्योनि रयोनिजा । भगरूपा भगस्थात्री भगिनी भगमालिनी ॥ १३७ ॥ भगात्मिका भगाधारा रूपिणी भगशालिनी । लिङ्गाभिधायिनी लिङ्गप्रिया लिङ्ग-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निवासिनी ॥ १३८ ॥ लिङ्गस्था लिङ्गिनी लिङ्गरूपिणी लिङ्गसुन्दरी ।
लिङ्गगीतिर्महाप्रीतिर्भगगीतिर्महासुखा ॥ १३९ ॥ लिङ्गनाम
सदानन्दा भगनामसदारतिः । भगनामसदानन्दा लिङ्गनामसदारतिः
॥ १४० ॥ लिङ्गमालाकराभूषा भगमालाविभूषणा । भगलिङ्गामृत
धृता भगलिङ्गामृतात्मिका ॥ १४१ ॥ भगलिङ्गार्चनप्रीता भगलिङ्ग-
स्वरूपिणी । भगलिङ्गस्वरूपा च भगलिङ्गसुखावहा ॥ १४२ ॥
स्वयम्भूकुसुमप्रीता स्वयंम्भूकुसुमार्चिता । स्वयम्भू कुसुमप्राणा स्वयम्भू
कुसुमोत्थिता ॥ १४३ ॥ स्वयम्भू कुसुमस्नाता स्वयम्भू पुष्पतर्पिता ।
स्वयम्भूपुष्पघटिता स्वयम्भूपुष्पधारिणी ॥ १४४ ॥ स्वयम्भूपुष्प-

CC-0. Pandit Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तिलका स्वयम्भूपुष्पचर्चिता । स्वयम्भूपुष्पनिरता स्वयम्भूकुसुमाग्रहा ॥ १४५ ॥ स्वयम्भूपुष्पयज्ञाशा स्वयम्भूकुसुमालिका । स्वयम्भू-पुष्पनिचिता स्वयम्भूकुसुमप्रिया ॥ १४६ ॥ स्वयम्भूकुसुमादान लालसोन्मत्तमानसा । स्वयम्भूकुसुमानन्दलहरी स्निग्धदेहिनी ॥ १४७ ॥ स्वयम्भूकुसुमाधारा स्वयम्भूकुसुमाकुला । स्वयम्भू-पुष्पनिलया स्वयम्भूपुष्पवासिनी ॥ १४८ ॥ स्वयम्भूकुसुमा-स्निग्धा स्वयम्भूकुसुमात्मिका । स्वयम्भूपुष्पकरिणी स्वयम्भूपुष्पमालिका ॥ १४९ ॥ स्वयम्भूकुसुमन्यासा स्वयम्भूकुसुमप्रभा । स्वयम्भू-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुसुमज्ञानां स्वयम्भूपुष्पभोगिनी ॥ १५० ॥ स्वयम्भूकुसुमोल्लासां
स्वयम्भूपुष्पवर्षिणी । स्वयम्भूकुसुमानन्दा स्वयम्भूपुष्पपुष्पिणी ॥ १५१॥
स्वयम्भूकुसुमोत्साहा स्वयम्भूपुष्परूपिणी । स्वयम्भूकुसुमोन्मादा स्वयम्भू-
पुष्पसुन्दरी ॥ १५२ ॥ स्वयम्भूकुसुमाराध्या स्वयम्भूकुसुमोद्भवा ।
स्वयम्भूकुसुमव्यग्रा स्वयम्भूपुष्पपूर्णिता ॥ १५३ ॥ स्वयम्भूपूजकप्राज्ञा
स्वयभूहोत्रिमात्रिका । स्वयभूदातृरक्षित्व स्वयभूभक्तभाविका ॥ १५४
स्वयम्भूकुसुमप्रीता स्वयम्भूपूजकप्रिया । स्वयम्भूवन्दकाधारा स्वयम्भू-
निन्दकान्तका ॥ १५५ ॥ स्वयम्भूप्रदसर्वस्वा स्वयम्भूप्रदपुत्रिणी -

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्वयम्भूप्रदसस्मेरा स्वयम्भूतशरीरिणी ॥ १५६ ॥ सर्वलोकोद्भवप्राप्ति

सर्वकालोद्भवात्मिका । सर्वकालोद्भवोद्भावा सर्वकालोद्भवोद्भवा ॥
कुण्डपुष्पसमाप्रीतिः कुण्डपुष्पसमारतिः । कुण्डगोलोद्भवप्रीता
कुण्डगोलोद्भवात्मिका ॥ १५८ ॥ स्वयंभूर्वा शिवा शक्ता पाविनी
लोकपाविनी । कीर्तिर्यशस्विनी मेधा विमेधा सुरसुन्दरी ॥ १५९ ॥
अश्विनी कृत्तिका पुष्या तेजस्वी चन्द्रमण्डला । सूक्ष्मा सूक्ष्मप्रदा
सूक्ष्मासूक्ष्मभयविनाशिनी ॥ १६० ॥ वरदा भयदा चैव मुक्तिबन्ध-
विनाशिनी । कामुकी कामदा कान्ता क्षान्ता कामाख्या कुलसुन्दरी ॥
सुखदा दुःखदा मोक्षा मोक्षदार्थप्रकाशिनी । दुष्टदुष्टमती चैव सर्व-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कार्यविनाशिनी ॥ १६२ ॥ शुक्राधारा शुक्ररूपा शुक्रसिन्धुनिवासिनी।
शुक्रालया शुक्रभोगा शुक्रपूजासदारतिः ॥ १६३ ॥ शुक्रपूज्या
शुक्रहोमसन्तुष्टा शुक्रवत्सला। शुक्रमूर्तिः शुक्रदेहा शुक्रपू-
जकपुत्रिणी ॥ १६४ ॥ शुक्रस्था शुक्रिणी शुक्रसंस्पृहा शुक्रसुन्दरी।
शुक्रस्नाता शुक्रकरी शुक्रसेव्याऽतिशुक्रिणी ॥ महाशुक्रा शुक्रभवा
शुक्रवृष्टिविधायिनी। शुक्राभिधेयाशुक्रार्हा शक्रवन्दकवान्दिता ॥१६६॥
शुक्रानन्दकरी शुक्रसदानन्दविधायिनी। शुक्रोत्साहा सदा शुक्रपूर्णा
शुक्रमनोरमा ॥ १६७ ॥ शुक्रपूजकसर्वस्वा शुक्रनिन्दकनाशिनी।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
शुक्रात्मिका शुक्रसंपच्छुक्राकर्षणकारिणी ॥ १६८ ॥ रक्ताशया

रक्तभोगा रक्तपूजासदारतिः । रक्तपूज्या रक्तहोमा रक्तस्था रक्तवत्सला ॥ १६९ ॥ रक्तपूर्णा रक्तदेहा रक्तपूजकपुत्रिणी । रक्ताख्या रक्तिनी रक्तसंस्पृहा रक्तसुन्दरी ॥ १७० ॥ रक्ताभिदेहा रक्तार्हा रक्तवन्द-कवन्दिता । महारक्ता रक्तभवा रक्तवृष्टिविधायिनी ॥ १७१ ॥ रक्तस्नाता रक्तप्रीता रक्तसेव्याऽतिरक्तिनी । रक्तानन्दकरी रक्तसदानन्दविधायिनी ॥ १७२ ॥ रक्तारक्ता रक्तपूर्णा रक्तसंव्य-क्षणीरमा । रक्तसेवकसर्वस्वा रक्तनिन्दकनाशिनी ॥ १७३ ॥ रक्तात्मिका रक्तरूपा रक्ताकर्षणकारिणी । रक्तोत्साहा रक्तव्यग्र

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रक्तपानपरायणा ॥ १७४ ॥ शोणितानन्दजननी कल्लोलस्निग्धरूपिणी ।
साधकान्तर्गता देवी पाविनी पापनाशिनी ॥ १७५ ॥ साधूनां
हृदिसंस्थात्री साधकानन्दकारिणी । साधकानां च जननी साधक-
प्रियकारिणी ॥ १७६ ॥ साधकप्रचुरानन्दसम्पत्तिसुखदायिनी ।
साधका साधकप्राणा साधकासक्तमानसा ॥ १७७ ॥ साधकोत्तम-
सर्वस्वा साधका भक्तरक्तपा । साधकानन्दसन्तोषा साधकारिविनाशिनी
॥ १७८ ॥ आत्मविद्या ब्रह्मविद्या परब्रह्मकुटुम्बिनी । त्रिकूटस्था
पञ्चकूटा सर्वकूटाशरीरिणी ॥ १७९ ॥ सर्ववर्णमयी वर्णजपमाला-
विधायिनी । इति श्रीकालिकानाम्नां सहस्रं शिवभाषितम् ॥ १८० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गुह्याद्गुह्यतरं साक्षान्महापातकनाशनम् । पूजाकाले निशीथे च सन्ध्ययोरुभयोरपि ॥ १८१ ॥लभते गाणपत्यं स यः पठेत्साधकोत्तमः । यः पठे त्पाठयेद्वापि शृणोति श्रावयेदपि ॥ १८२॥ सर्वपापविनिर्मुक्तः स याति कालिकापदं । श्रद्धयाऽश्रद्धया वापि यः कश्चिन्मानवः पठेत् ॥ १८३ ॥ दुर्गा दुर्गतरं तीर्त्वा स याति कालिकापदम् । वन्ध्या वा काकवन्ध्या च मृतपुत्रा च याङ्गना ॥२८४ श्रुत्वा स्तोत्रीमंद पुत्रान् लभते चिरजीविनः । यं यं कामयते कामं पठन्स्तोत्रमनुत्तमम् ॥ १८५ ॥ देवीवरप्रदानेन तं तं प्राप्नोति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नित्यशः । स्वयम्भूकुसुमैः शुक्लैः सुगन्धिकुसुमान्वितैः ॥ १८६ ॥
यवायावकसिन्दूर रक्तचन्दनसंयुतैः । मत्स्यमांसादिभि र्वीरो मधुभिः
साज्यपायसैः ॥ १८७ ॥ भक्त्योपनीतै र्मन्त्रेण साधितैः शक्तिभिः
सह । पञ्चोपचारै र्नैवेद्यै र्बलिभिर्बहुशोणितैः ॥ १८८ ॥ धूपदीपै-
र्महादेवीं पूजयित्वा मनोहरैः । जप्त्वा महामन्त्रं स्तोत्रं पठे द्भक्ति-
समन्वितः ॥ १८९ ॥ अनन्यचेताः स्थिरधीर्मुक्तकेशो
दिगम्बरः । शवारूढ श्चितास्थो वा श्मशानालय मागतः ॥ १९० ॥
शून्यालयगतो वापि शय्यास्थो वापि साधकः । स भवेत्कालिकापुत्रो
इति ख्याति मुपागतः ॥ १९१ ॥ सर्वविद्यावतां श्रेष्ठो धनेन च

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धनाधिपः । वायुतुल्यबलो लोके दुर्जयः शत्रुमर्दनः ॥ १९२ ॥ सर्वसङ्कटसंतीर्णः सर्वसिद्धिसमन्वितः । मधुमत्या स्वयंदेव्या सेव्यमानः स्मरोपमः ॥ १९३ ॥ महेश इव योगीन्द्रः सर्वशत्रुपुरस्कृतः । कालिका कामरूपोऽसौ सर्वाकर्षणकारकः ॥ १९४ ॥ जलसूर्येन्दुवायूनां स्तंभको राजवल्लभः । यशस्वी सत्कविर्धीमान् सन्मन्त्री कोकिलस्वरः ॥ १९५ ॥ बहुपुत्रो गजाश्वानामीश्वरो धार्मिकः कृती । मार्कण्डेय इवाऽयुष्मान् जरापलितवर्जितः ॥ १९६ ॥ नवयौवनयुक्तः स्यादपि वर्षसहस्रभाक् । बहु किं कथ्यतां तस्य पठतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्तवमुत्तमम् ॥ १९७ ॥ न किञ्चि दुर्लभं लोके यद्यन्मनसि कल्पितम् ।
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ॥ १९८ ॥ सर्वमाशु तरत्येव
स्तवस्यास्य प्रसादतः । रजस्वलाभगं पश्यन् जप्त्वा काळीमहामनुम्
॥ १९९ ॥ स्तवेनानेन संस्तुत्य साधकः किं न साधयेत् । परदारपरो
वापि जप्त्वा मन्त्रं स्तवं पठेत् ॥ २०० ॥ कुबेर इव वित्ताढ्यो
जायते मदनोपमः । अष्टोत्तरशतं जप्त्वा योनि मामन्त्र्य भक्तितः
॥ २०१ ॥ सङ्गम्य पठनादस्य सर्वसिद्धेश्वरो भवेत् । दिगम्बरो
मुक्तकेशः शय्यास्थो मैथुनी नरः ॥ २०२ ॥ जप्त्वा स्तुत्वा महादेवीं
खेचरो जायते चिरात् । शुक्रोत्सरणकाले तु जपपूजापरायणः ॥२०३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्मशानकालिकां स्तुत्वा वाणीवत्सकविर्भवेत् । आलोकयन् चिन्त-
यन्वा विवस्त्रां परयोषितम् ॥ २०४ ॥ जप्त्वास्तुत्वा महेशानीं
सर्वपापात्प्रमुच्यते । सुरतेषु मनुं जप्त्वा स्तुत्वा भगवतीं शिवाम्
॥ २०५ ॥ सर्वपापैः परित्यक्तो मानवः स्या त्सुरोपमः ।
कुहूपूर्णेंदुसंक्रान्त्यां चतुर्दश्यष्टमीषु च ॥ २०६ ॥ नवम्यां मङ्गलदिने-
पठेत् स्तोत्रं प्रयत्नतः । भौमावास्यानिशीथे च चतुष्पथगतो नरः ॥
मांसभक्तबलिं दद्यात्सदुग्धं मीनशोणितम् । अष्टोत्तरशतं
जप्त्वा पठेन्नामसहस्रकम् ॥ २०८ ॥ सुदर्शनो भवेदाशु सर्व-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गन्धर्वसेवितः । सदा शिवो भवत्येष जन्माशाभ्यासयोगतः ॥२०९॥
येन केन प्रकारेण लिङ्गस्तुतिपरायणः । स्तम्भयेदखिला-
न्लोकान् राजानमपि मोहयेत् ॥ २१० ॥ आकर्षयेद्देवकन्यां
वशये दपि केशवम् । मारये दखिला न्लोका नुच्चाटयति शात्रवान् ॥
नरमार्जारमहिषछागमूषकशोणितैः । सास्थिमांसै रसमधुभिः सामृतैः
साज्यपायसैः ॥ २१२ ॥ योनिक्षालनतोयेन भगलिङ्गामृतेन च ।
शुक्रैः पूजा जपान्ते यो देवीं सन्तर्प्य साधकः ॥ २१३ ॥ सहस्रना-
मभि र्देवीं स्तौति भक्तिपरायणः । मातेव कालिका यस्य सर्वत्र
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
हितकारिणी ॥ २१४ ॥ परनिन्दा परद्रोह परिवादपराय च । खलाय

परतन्त्राय भ्रष्टाय साधकाय च ॥ २१५ ॥ शिवाभक्ताय दुष्टाय दूषकाय दुरात्मने। हरिभक्तिविहीनाय परदारपराय च। ॥ २१६॥ पूजाजपविहीनाय स्त्रीसुरानन्दकाय च। न स्तवं दर्शयेद्दिव्यं दर्शयन् शिवहा भवेत् ॥ २१७ ॥ कुलीनाय महेच्छाय दुर्गा-भक्तिपराय च। वैष्णवाय विशुद्धाय शक्तिभक्ताय मन्त्रिणे ॥२१८॥ अद्वैतानन्दरूपाय निवेदितपराय च। दद्यात् स्तोत्रं महादेव्याः साधकाय तथाऽऽज्ञया ॥ २१९ ॥ गुरुविष्णुमहेशानामभेदेन

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

महेश्वरी। समन्तात् भावयेन्मन्त्री महेशो नात्र संशयः ॥ सशक्तिः

शिवभक्तश्च स एव वैष्णवोत्तमः । संपूज्य स्तौति यः काळी मद्वैतभावं-
मावहन् ॥ देव्यानन्देन सानन्दो देवीभक्तैकभक्तिमान् । स एव धन्यो
यस्यार्धे महेशो व्यग्रमानसः ॥ २२२ ॥ कामयित्वा यथाकामं स्तवमेन-
मुदीरयेत् । सर्वरोगैः परित्यक्तो जायते मदनोपमः ॥ २२३ ॥
चक्रं वा स्तवमेनं वा धारयेदङ्गसङ्गतम् । विलिख्य
विधिवत्साधुः स एव कालिकातनुः ॥ २२४ ॥ देव्यै निवेदितं यद्य-
त्तस्यांशं भक्षयेन्नरः । दिव्यदेहधरो भूत्वा देव्याः पार्श्वचरो भवेत् ॥
२२५ ॥ नैवेद्यनिन्दकं दृष्ट्वा नृत्यन्ति योगिनीगणाः । रक्तपानोद्यता-
स्सर्वे मांसास्थिचर्वणोद्यताः ॥ २२६ ॥ तस्मान्निवेदितं देव्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दृष्ट्वा श्रुत्वा च मानवः । न निन्देन्मनसा वाचा कुष्ठव्याधिपराङ्मुखः ॥२२७॥ आत्मानङ्कालिकात्मानं भावयन् स्तौति यः शिवाम् । शिवोपमं गुरुं ध्यात्वा स एव श्रीसदाशिवः ॥ २२८ ॥ यस्यालये तिष्ठति नूनमेतत् स्तोत्रं भवान्या लिखितं विधिज्ञैः । गोरोचनालक्तककुङ्कुमाक्तकर्पूरसिन्दूरमधुद्रवेण ॥ २२९ ॥ न तत्र चोरस्य भयं न हास्यो न वैरिभिर्नाशनिवह्निभीतिः । उत्पातवायोरपि नात्र शङ्का लक्ष्मीः स्वयं तत्र वसेदलोला ॥ २३० ॥ स्तोत्रं पठेत्तदनन्तपुण्यं देवीपदाम्भोज-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

परो मनुष्यः । विधानपूजाफलमेव सम्यक्प्राप्नोति सम्पूर्णमनोरथोऽसौ

॥२३१॥ मुक्ताः श्रीचरणारविन्दनिरताः स्वर्गामिनो भोगिनो ब्रह्मो-पेन्द्रशिवात्मकार्चनरता लोकेऽपि संलेभिरे। श्रीमच्छङ्करभक्तिपूर्वक-महादेवीपदध्यायिनो मुक्तिर्मुक्तिमतिः स्वयं स्तुतिपरा भक्तिः करस्थायिनी ॥ २३२ ॥

इति श्रीकालिकाकुलसर्वस्वे हरपरशुरामसंवादो
श्रीकालिकासहस्रनामस्तोत्रं सम्पूर्णम्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ श्रीरस्तु ॥

॥ श्रीकालिकासहस्रनामावलिः ॥

ओं श्मशानकालिकायै नमः

काल्यै

भद्रकाल्यै

कपालिन्यै

दुर्गाकाल्यै

ओं महाकाल्यै नमः

कुरुकुल्यायै

विरोधिन्यै

कालिकायै

कालरात्र्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

महाकालनितम्बिन्यै
कालभैरवभार्यायै
कुलवर्मप्रकाशिन्यै
कामायै
कामिन्यै
काम्यायै
कमनीयसुभाविन्यै
कस्तूरीरसनीलाङ्गिन्यै
कुञ्जरेश्वरगामिन्यै

ककारवर्णसर्वाङ्गिन्यै
कामिन्यै
कामसुन्दर्यै
कामार्तायै
कामरूपायै
कामधेनवे
कलावत्यै
कान्तायै
कामस्वरूपायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं कामाख्यायै नमः

कुलपालिन्यै ३०

कुलीनायै

कुलवत्यै

अम्बायै

दुर्गायै

दुर्गार्तिनाशिन्यै

कौमार्यै

ओं कुलजायै नमः

कृष्णाकृष्णदेहायै

कृशोदर्यै

कृशांग्यै ४०

कुलिशांग्यै

क्रींकार्यै

कमलायै

कलायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

करालास्यायै

करालयै

कुलकान्तायै

अपराजितायै

उग्रायै

उग्रप्रभायै ५०

दीप्तायै

विप्रचित्तायै

महाबलायै

नीलायै

घनायै

बलाकायै

मात्रायै

मुद्रापितायै

असितायै

ब्राह्मै ६०

नारायण्यै

भद्रायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं सुभद्रायै नमः
भक्तवत्सलायै
माहेश्वर्यै
चामुण्डायै
वाराहिन्यै
नारसिंहिकायै
वज्रांग्यै
वज्रकङ्कालायै

ओं नृमुण्डायै नमः
स्रग्विण्यै
शिवायै
मालिन्यै
नरमुण्डालिन्यै
गलद्रक्तविभूषणायै
रक्तचन्दनसिक्तांगिन्यै
सिन्दूरारुणमस्तकायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

घोररूपायै

घोरदंष्ट्रायै ८०

घोराघोरतरायै

शुभायै

महादंष्ट्रायै

महामायायै

सुदत्यै

युगदन्तुरायै

सुलोचनायै

विरूपाक्षिण्यै

विशालाक्षिण्यै

त्रिलोचनायै ९०

शारदेंदुप्रसन्नायै

स्फुरत्स्मेराम्बुजेक्षणायै

अट्टहासायै

प्रसन्नायै

स्मेरवक्त्रायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सुभाषिण्यै

ओं प्रसन्नपद्मवदनायै नमः
स्मितास्यायै
प्रियभाषिण्यै
कोटराक्षिण्यै १००
कुलश्रेष्ठायै
महत्यै
बहुभाषिण्यै
सुमत्यै

ओं कुमत्यै नमः
चण्डायै
चण्डमुण्डायै
अतिवेगिन्यै
प्रचण्डायै
चण्डिकायै ११०
चण्ड्यै
चर्चिकायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चण्डवेगिन्यै

सुकेशिन्यै

मुक्तकेशिन्यै

दीर्घकेशिन्यै

महत्कचायै

प्रेतदेहायै

कर्णपूरायै

प्रेतपाणिन्यै

सुमेखलायै

प्रेतासनायै

प्रियप्रेतायै

प्रेतभूमिकृतालयायै

श्मशानवासिन्यै

पुण्यायै

पुण्यदायै

कुलपण्डितायै

पुण्यालयायै

पुण्यदेहायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं पुण्यश्लोक्यै नमः
पावन्यै
पुत्रायै
पवित्रायै
परमायै
पुरायै
पुण्यविभूषणायै
पुण्यमात्रे

ओं भीतिहरायै नमः
वरदायै १४०
खड्गपाणिन्यै
नृमुण्डहस्तशस्तायै
छिन्नमस्तायै
सुनासिकायै
दक्षिणायै
श्यामलायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्यामायै

शान्तायै

पीनोन्नतस्तन्यै

दिगम्बरायै १५०

घोररावायै

सृक्कान्तायै

रक्तवाहिन्यै

घोररावायै

शिवायै

खड्गायै

विशङ्कायै

मदनातुरायै

मत्तायै

प्रमत्तायै १६०

प्रमदायै

सुधासिन्धुनिवासिन्यै

अतिमत्तायै

महामत्तायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं सर्वाकर्षणकारिण्यै नमः
गीतप्रियायै
वाद्यरतायै
प्रेतनृत्यपरायणायै
चतुर्भुजायै
दशभुजायै
अष्टादशभुजायै
कात्यायन्यै

ओं जगन्मात्रे नमः
जगत्यै
परमेश्वर्यै
जगद्बन्धवे
जगद्धात्र्यै
जगदानन्दकारिण्यै
जगन्मय्यै
हैमवत्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

महामायायै

महामहायै

नागयज्ञोपवीताङ्गिन्यै

नागिन्यै

नागशायिन्यै

नागकन्यायै

देवकन्यायै

गन्धर्व्यै

किन्नरेश्वर्यै

मोहरात्र्यै

महारात्र्यै

दारुणायै

भासुराम्बरायै

विद्याधर्यै

वसुमत्यै

यक्षिण्यै

योगिन्यै

जरायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं राक्षस्यै नमः
डाकिन्यै २००
वेदमय्यै
वेदविभूषणायै
श्रुत्यै
स्मृत्यै
महाविद्यायै
गुह्यविद्यायै

ओं पुरातन्यै नमः
चिन्त्यायै
अचिन्त्यायै
सुधायै २१०
स्वाहायै
निद्रायै
तन्द्रायै
पार्वत्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अपर्णायै

निश्चलायै

लोलायै

सर्वविद्यायै

तपस्विन्यै

गङ्गायै २२०

काश्यै

शच्यै

सीतायै

सत्यै

सत्यपरायणायै

नीत्यै

सुनीत्यै

सुरुच्यै

तुष्ट्यै

पुष्ट्यै २३०

धृत्यै

क्षमायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं वाण्यै नमः
बुद्ध्यै
महालक्ष्म्यै
लक्ष्म्यै
नीलसरस्वत्यै
स्रोतस्वत्यै
सरस्वत्यै
मालत्यै

ओं विजयायै नमः
जयायै
नद्यै
सिन्धवे
सर्वमय्यै
तारायै
शून्यनिवासिन्यै
शुद्धायै

CC-0. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तरङ्गिण्यै

मेधायै २५०

लाकिन्यै

बहुरूपिण्यै

स्थूलायै

सूक्ष्मायै

सूक्ष्मतरायै

सरावद्दनुरूपिण्यै

परमाणुस्वरूपायै

चिदानन्दस्वरूपिण्यै

सदानन्दमय्यै

सत्यायै २६०

सर्वानन्दस्वरूपिण्यै

सुनन्दायै

नन्दिन्यै

स्तुत्यायै

स्तवनीयस्वभाविन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रङ्गिण्यै

ओं टाङ्किन्यै नमः
चित्रायै
विचित्रायै
चित्ररूपिण्यै २७०
पद्मायै
पद्मालयायै
पद्ममुख्यै
पद्मविभूषणायै

ओं डाकिन्यै नमः
शाकिन्यै
क्षान्तायै
राकिन्यै
रुधिरप्रियायै
भ्रान्त्यै २८०
भवान्यै
रुद्राण्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मृडान्यै

शत्रुमर्दिन्यै

उपेंद्राण्यै

महेंद्राण्यै

ज्योत्स्नायै

चंद्रस्वरूपिण्यै

सूर्यात्मिकायै

रुद्रपत्न्यै

२९०

कात्यै

स्त्रियै

प्रकृत्यै

पुंसे

शक्त्यै

मुक्त्यै

मत्यै

मात्रे

भक्त्यै

मुक्त्यै

३००

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं पतिव्रतायै नमः
सर्वेश्वर्यै
सर्वमात्रे
शर्वाण्यै
हरवल्लभायै
सर्वज्ञायै
सिद्धिदायै
सिद्धायै

ओं भव्यायै नमः
भाव्यायै
भयापहायै
कर्त्र्यै
हर्त्र्यै
पालयित्र्यै
शर्वर्यै
तामस्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दयायै

तमिस्रायै

तामस्यै

स्थाष्णवे ३२०

स्थिरायै

धीरायै

तपस्विन्यै

चार्वंग्यै

चंचलायै

लोलजिह्वायै

चारुचरित्रिण्यै

त्रपायै

त्रपावत्यै

लज्जायै ३३०

विलज्जायै

हरयौवत्यै

सत्यवत्यै

धर्मनिष्ठायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं विशिष्टायै नमः
श्रेयस्यै
घृणायै
भीमायै
भयानकायै
भीमनादिन्यै ३४०
भव्यायै
प्रभावत्यै

ओं वागीश्वर्यै नमः
श्रियै
यमुनायै
यज्ञकर्त्र्यै
यजुःप्रियायै
ऋक्सामाथर्वनिलयायै
सावित्र्यै
शोभनायै ३५०

CC-0. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सुरायै
कलकण्ठ्यै
कंबुकंठ्यै
वेणुवीणापरायणायै
वंशिन्यै
वैष्णव्यै
स्वच्छायै
धात्र्यै
त्रिजगतीश्वर्यै

मधुमत्यै
कुंडलिन्यै
ऋद्ध्यै
शुद्ध्यै
शुचिस्मितायै
रंभोर्वश्यै
रत्यै
रमायै
रोहिण्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं रेवत्यै नमः

मघायै ३७०

शंखिन्यै

चक्रिण्यै

कृष्णायै

गदिन्यै

पद्मिन्यै

शूलिन्यै

ओं परिघास्त्रायै नमः

पाशिन्यै

शार्ङ्गपाणिन्यै

पिनाकधारिण्यै ३८०

धूम्रायै

सुरभ्यै

वनमालिन्यै

रथिन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

समरप्रीतायै

वेगिन्यै

रणपंडितायै

जटिन्यै

वज्रिण्यै

नीललावण्यायै ३९०

अंबुधिचंद्रिकायै

वलिप्रियायै

सदापूज्यायै

दैत्येंद्रमथिन्यै

महिषासुरसंहर्त्र्यै

कामिनीरक्तदंतिकायै

रक्तपायै

रुधिराक्तांग्यै

रक्तखर्परधारिण्यै

रक्तप्रियायै ४००

मांसरुच्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वासवासक्तमानसायै

ओं गलच्छोणितमुंडाल्यै नमः
कंठमालाविभूषणायै
शवासनायै
चितांतस्थायै
महेश्यै
वृषवाहिन्यै
व्याघ्रत्वगम्बरायै
चीनचेलिन्यै

ओं सिंहवाहिन्यै नमः
वामदेव्यै
महादेव्यै
गौर्यै
सर्वज्ञभामिन्यै
बालिकायै
तरुण्यै
वृद्धायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वृद्धमात्रे

जरातुरायै ४२०

सुभ्रुवे

विलासिन्यै

ब्रह्मवादिन्यै

ब्राह्मण्यै

सत्यै

सुप्तवत्यै

चित्रलेखायै

लोपामुद्रायै

सुरेश्वर्यै

अमोघायै ४३०

अरुंधत्यै

तीक्ष्णायै

भोगवत्यै

अनुरागिण्यै

मंदाकिन्यै

मंदहासायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं ज्वालामुख्यै नमः
सुरांतकायै
मानदायै
मानिन्यै ४४०
मान्यायै
माननीयायै
महातुरायै
मादिरायै

ओं मेदुरायै नमः
उन्मादायै
मेध्यायै
साध्यायै
प्रसादिन्यै
सुमध्यायै ४५०
अनन्तगुणिन्यै
सर्वलोकोत्तमायै

CC-0. Haridaya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उत्तमायै

जयदायै

जित्वर्यै

जैत्र्यै

जयश्रियै

जयशालिन्यै

सुखदायै

शुभदायै

सत्यायै

सख्यै

संक्षोभकारिण्यै

शिवदूत्यै

भूतमत्यै

विभूत्यै

भूषणाननायै

कौमार्यै

कुलजायै

कुन्त्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं कुलस्त्रियै नमः
कुलपालिकायै
कीर्त्यै
यशस्विन्यै
भूषायै
भूष्टायै
भूतपतिप्रियायै
सुगुणायै

ओं निर्गुणायै नमः
अधिष्ठायै ४८०
निष्ठायै
काष्ठायै
प्रकाशिन्यै
धनिष्ठायै
घनद्वायै
धान्यायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वसुधायै

सुप्रकाशिन्यै

उर्व्यै

गुर्व्यै ४९०

गुरुश्रेष्ठायै

षड्गुणायै

त्रिगुणात्मिकायै

राज्ञा माज्ञायै

महाप्राज्ञायै

सुगुणायै

निर्गुणात्मिकायै

महाकुलीनायै

निष्कामायै

सकामायै ५००

कामजीवनायै

कामदेवकलायै

समायै

अभिरामायै

CC-0. Jain Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं शिवनर्तक्यै नमः
चिन्तामण्यै
कल्पलतायै
जाग्रत्यै
दीनवत्सलायै
कार्तिक्यै ५१०
कृत्तिकायै
कृत्यायै

ओं अयोध्यायै नमः
विषमायै
समायै
सुमंत्रायै
मंत्रिण्यै
घूर्णायै
हालिन्यै
क्लेशनाशिन्यै ५२०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्रैलोक्यजनन्यै
हृष्टायै
निर्मांसामलरूपिण्यै
तडागनिम्नजठरायै
शुष्कमांसास्थिमालिन्यै
अवन्त्यै
मधुरायै
हृद्यायै
त्रैलोक्यपावनक्षमायै

व्यक्तायै
अव्यक्तायै
एकमूर्त्यै
शरभ्यै
भीमनादिन्यै
क्षेमंकर्यै
शांकर्यै
सर्वसम्मोहकारिण्यै
ऊर्ध्वतेजोवन्त्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं छिन्नायै नमः

महातेजस्विन्यै ५४०

अद्वैतायै

योगिन्यै

पूज्यायै

सुरभ्यै

सर्वमङ्गलायै

सर्वप्रियंकर्यै

ओं भोग्यायै नमः

धनिन्यै

पिशिताशनायै

भयङ्कर्यै ५५०

पापहरायै

निष्कलङ्कायै

वशंकर्यै

आशायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तृष्णायै

चंद्रकळायै

निद्राणायै

वायुवेगिन्यै

सहस्रसूर्यसङ्काशायै

चंद्रकोटिसमप्रभायै ५६०

निशुंभसंहंत्र्यै

रक्तबीजविनाशिन्यै

मधुकैटभसंहंत्र्यै

महिषासुरघातिन्यै

वह्निमण्डलमध्यस्थायै

सर्वसत्वप्रतिष्ठितायै

सर्वाचारवत्यै

सर्वदेवकन्यायै

अतिदेवतायै

दक्षकन्यायै ५७०

दक्षयज्ञनाशिन्यै

दुर्गतारिण्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं इज्यायै नमः
पूज्यायै
विभायै
भूत्यै
सत्कीर्त्यै
ब्रह्मचारिण्यै
रम्भोर्व्यै
चतुरायै

ओं राकायै नमः
जयंत्यै
वरुणायै
कुहुवे
मनस्विन्यै
देवमात्रे
यशस्यै
ब्रह्मवादिन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सिद्धिदायै

वृद्धिदायै ५९०

वृद्ध्यै

सर्वाद्यायै

सर्वदायिन्यै

आधाररूपिण्यै

ध्येयायै

मूलाधारनिवासिन्यै

आज्ञायै

प्रज्ञायै

पूर्णमनसे

चंद्रमुख्यै ६००

अनुकूलिन्यै

वावदूकायै

निम्ननाभ्यै

सत्यसन्धायै

दृढव्रतायै

आन्वीक्षिक्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं दंडनीत्यै नमः
त्रय्यै
त्रिदिवसुंदर्यै
ज्वलिन्यै ६१०
ज्वालिन्यै
शैलतनयायै
विंध्यवासिन्यै
प्रत्ययायै

ओं खेचर्यै नमः
धैर्यायै
तुरीयायै
विमलतुरायै
प्रगल्भायै
वारुण्यै ६२०
क्षामायै
दर्शिन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विंस्फुलिङ्गिन्यै

भक्त्यै

सिद्ध्यै

सदाप्राप्त्यै

प्रकाम्यायै

महिमायै

अणिमायै

ईक्षायै ६३०

सिद्ध्यै

वशित्वायै

ईशित्वायै

ऊर्ध्वनिवासिन्यै

लघिमायै

सावित्र्यै

गायत्र्यै

भुवनेश्वर्यै

मनोहरायै

चितायै ६४०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं दिव्यायै नमः
देव्युदारायै
मनोरमायै
पिङ्गळायै
कपिलायै
जिह्वायै
रसज्ञायै
रसिकायै

ओं रसायै नम
सुषुम्नेडायोगवत्यै ६५०
गान्धार्यै
नवकान्तकायै
पाञ्चाल्यै
रुक्मिण्यै
राधायै
राध्यायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भीमायै

राधिकायै

अमृतायै

तुलसीबृन्दायै ६६०

कैटभ्यै

कपटेश्वर्यै

उग्रचण्डेश्वर्यै

वीरजनन्यै

वीरसुन्दर्यै

उग्रतारायै

यशोदाख्यायै

देवक्यै

देवमानितायै

निरञ्जनायै ६७०

चित्रदेव्यै

क्रोधिन्ये

कुलदीपिकायै

कुलरागिण्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं ज्वालायै नमः
मात्रिकायै
द्राविण्यै
द्रवायै
योगिश्वर्यै
महामार्यै ६८०
भ्रामर्यै
बिन्दुरूपिण्यै

ओं दूत्यै नमः
प्राणेश्वर्यै
गुप्तायै
बहुलायै
डामर्यै
प्रभायै
कुब्जिकायै
ज्ञानिन्यै ६९०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ज्येष्ठायै

भृगुण्डिन्यै

प्रकटाकृत्यै

द्राविण्यै

गोपिन्यै

मायायै

कामबीजेश्वर्यै

प्रियायै

शाकम्भर्यै

कोकनदायै

सुसत्यायै

तिलोत्तमायै

अमेयायै

विक्रमायै

क्रूरायै

सम्यक्छीलायै

त्रिविक्रमायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्वस्त्यै

ओं हव्यवाहायै नमः
प्रीत्यै ७१०
रुक्मायै
धूम्रार्चिरङ्गदायै
तपिन्यै
तापिन्यै
विश्वभोगदायै
धरिणीधरायै

ओं त्रिखण्डायै नमः
रोधिन्यै
वश्यायै
सकलायै ७२०
शब्दरूपिण्यै
बीजरूपायै
महामुद्रायै
वशिन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

योगरूपिण्यै

अनङ्गकुसुमायै

अनङ्गमेखलायै

अनङ्गरूपिण्यै

अनङ्गमदनायै

अनङ्गरेखायै ७३०

अनङ्गकुशेश्वर्यै

अनङ्गमालिन्यै

कामेश्वर्यै

सर्वार्थसाधिकायै

सर्वतन्त्रमय्यै

सर्वमोदिन्यै

आनन्दरूपिण्यै

वज्रेश्वर्यै

जयिन्यै

सर्वदुःखक्षयङ्कर्यै ७४०

षडङ्गयुवत्यै

योगयुक्तायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं ज्वालांशुमालिन्यै नमः
दुराशयायै
दुराधारायै
दुर्जयायै
दुर्गरूपिण्यै
दुरन्तायै
दुष्कृतिहरायै
दुर्ध्येयायै

ओं दुरतिक्रमायै नमः
हंसेश्वर्यै
त्रिलोकस्थायै
शाकम्भर्यै
अनुरागिण्यै
त्रिकोणनिलयायै
नित्यायै
परमामृतरञ्जितायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

महाविद्येश्वर्यै

श्वेतायै ७६०

भेरुन्डायै

कुलसुन्दर्यै

त्वरितायै

भक्तिसंयुक्तायै

भक्तिवश्यायै

सनातन्यै

भक्तानन्दमय्यै

भक्तभावितायै

भक्तशङ्कर्यै

सर्वसौन्दर्यनिलयायै ७७०

सर्वसौभाग्यशालिन्यै

सर्वसम्भोगभवनायै

सर्वसौख्यानुरूपिण्यै

कुमारीपूजनरतायै

कुमारीव्रतचारिण्यै

कुमारीभक्तिसुखिन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं कुमारीरूपधारिण्यै नमः
कुमारीपूजकप्रीतायै
कुमारीप्रीतिदप्रियायै
कुमारीसेवकसङ्गायै ७८०
कुमारीसेवकालयायै
आनन्दभैरव्यै
बालभैरव्यै
वटुभैरव्यै

ओं श्मशानभैरव्यै नमः
कालभैरव्यै
पुरभैरव्यै
महाभैरवपत्न्यै
परमानन्दभैरव्यै
सुरानन्दभैरव्यै ७९०
उन्मदानन्दभैरव्यै
यज्ञानन्दभैरव्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तरुणभैरव्यै

ज्ञानानन्दभैरव्यै

अमृतानन्दभैरव्यै

महाभयङ्कर्यै

तीव्रायै

तीव्रवेगायै

तरस्विन्यै

त्रिपुरायै ८००

परमेशान्यै

सुन्दर्यै

पुरसुंदर्यै

त्रिपुरेश्यै

पञ्चदश्यै

पञ्चम्यै

पुरवासिन्यै

महासप्तदश्यै

षोडश्यै

त्रिपुरैश्वर्यै ८१०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं महाङ्कुशस्वरूपायै नमः
महाचक्रेश्वर्यै
नवचक्रेश्वर्यै
चक्रेश्वर्यै
त्रिपुरमालिन्यै
राजचक्रेश्वर्यै
राज्ञ्यै
महात्रिपुरसुंदर्यै

ओं सिंदूरपूरुचिरायै नमः
श्रीमत्त्रिपुरसुंदर्यै ८२०
सर्वाङ्गसुंदर्यै
रक्तारक्तवस्त्रोत्तरीयकायै
यत्रायावकसिंदूररक्तचंदनधा-
रिण्यै [धृते
यत्रायावकसिंदूररक्तचंदनरस-
चमरीवालकुटिलायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निर्मलश्यामकेशिन्यै

वज्रमौक्तिकरत्नाढ्यायै

किरीटकुन्डलोज्वलायै

रत्नकुन्डलसंयुक्तायै

स्फुरद्गन्डमनोरमायै ८३०

कुञ्जरेश्वरकुंभोत्थमुक्तारञ्चित-

नासिकायै

मुक्ताविद्रु ममाणिक्य हाराद्य-

स्तनमण्डलायै

सूर्यकान्तेंदुकान्ताढ्यायै

स्पर्शाश्मगलभूषणायै

बीजपूरस्फुरद्बीजदन्तपंक्तये

अनुत्तमायै [प्रवर्षिण्यै

कामकोदण्डजाभग्नभ्रूकटाक्ष-

मातङ्गकुंभवक्षोजायै

लसत्कनकदक्षिणायै

मनोज्ञशुष्कलीकर्णायै

हंसीगतिविडंबिन्यै ८४०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं पद्मरागाङ्गदद्योतद्दोश्चतुष्क-
प्रकाशिन्यै [तायै
कर्पूरागरुकस्तूरीकुङ्कुमद्रवलेपि-
विचित्ररत्नपृथिवी कल्पशाखि-
तलस्थितायै
रत्नद्वीपस्फुरद्रत्नसिंहासननिवा-
[सिन्यै
षट्चक्रभेदनकर्यै
परमानन्दरूपिण्यै
सहस्रदळपद्मांतायै
चन्द्रमण्डलवर्तिन्यै
प्रह्मरूपायै
शिवक्रोडायै ८५०
नानासुखविलासिन्यै
हरविष्णुविरिंचीन्द्रप्रहनायक-
शिवायै [-सेवितायै
शैवायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रुद्राण्यै
शिवनांदिन्यै
महादेवप्रियायै
देव्यै
अनङ्गमेखलायै
डागिन्यै ८६०
योगिन्यै
उपयोगिन्यै
मतायै

महेश्वर्यै
वैष्णव्यै
भ्रामर्यै
शिवरूपिण्यै
अलम्बुषायै
भोगवत्यै
क्रोधरूपायै ८७०
सुमेखलायै
गान्धार्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं हस्तिजिह्वायै
इडायै
शुभङ्कर्यै
पिङ्गलायै
दक्षसूत्र्यै
सुषुम्नायै
गान्धिन्यै
भगात्मिकायै

ओं भगाधारायै नमः
भगेश्यै
भगरूपिण्यै
लिङ्गाख्यायै
कामेश्यै
त्रिपुरायै
भैरव्यै
लिङ्गगीत्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सुगोत्यै

लिङ्गस्थायै ८९०

लिङ्गरूपधृते

लिङ्गमालायै

लिङ्गभवायै

लिङ्गलिङ्गायै

पावक्यै

भगवत्यै

कौशिक्यै

प्रेमरूपायै

प्रियंवदायै

गृध्ररूपिण्यै ९००

शिवरूपायै

चक्रेश्यै

चक्ररूपधृते

आत्मयोन्यै

ब्रह्मयोन्यै

जगद्योन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं अयोनिजायै नमः
भगरूपायै
भगस्थात्र्यै
भगिन्यै
भगमालिन्यै
भगात्मिकायै
भगाधारायै
रूपिण्यै

ओं भगशालिन्यै नमः
लिङ्गाभिधायिन्यै
लिङ्गप्रियायै
लिङ्गनिवासिन्यै
लिङ्गस्थायै
लिङ्गिन्यै
लिङ्गरूपिण्यै
लिङ्गसुन्दर्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लिङ्गगीत्यै

महाप्रीत्यै

भगगीत्यै

महासुखायै

लिङ्गनामसदानन्दायै

भगनामसदारत्यै

भगनामसदानन्दायै

लिङ्गनामसदारत्यै ९३०

लिङ्गमालाविभूषायै

भगमालाविभूषायै

भगलिङ्गामृतवृतायै

भगलिङ्गामृतात्मिकायै

भगलिङ्गार्चनप्रीतायै

भगलिङ्गस्वरूपिण्यै

भगलिङ्गस्वरूपायै

भगलिङ्गसुखावहायै

स्वयम्भूकुसुमप्रीतायै

स्वयम्भूकुसुमार्चितायै ९४०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं स्वयम्भूकुसुमप्राणायै नमः
स्वयम्भूकुसुमोत्थितायै
स्वयम्भूकुसुमस्नातायै
स्वयम्भू पुष्पतर्पितायै
स्वयम्भू पुष्पघटितायै
स्वयम्भू पुष्पधारिण्यै
स्वयम्भू पुष्पतिलकायै
स्वयम्भू पुष्पचर्चितायै

ओं स्वयम्भू पुष्पनिरतायै नमः
स्वयम्भू कुसुमाग्रहायै ९५०
स्वयम्भू पुष्पयज्ञेशायै
स्वयम्भू कुसुममालिकायै
स्वयम्भू पुष्पनिचितायै
स्वयम्भू कुसुमप्रियायै
स्वयम्भू कुसुमायै
दानलालसायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उन्मत्तमानसायै

स्वयम्भू कुसुमानन्दलहर्यै

स्निग्धदेहिन्यै

स्वयम्भू कुसुमाधारायै ९६०

स्वयम्भू कुसुमाकुलायै

स्वयम्भू पुष्पनिलयायै

स्वयम्भू पुष्पवासिन्यै

स्वयम्भू कुसुमस्निग्धायै

स्वयम्भू कुसुमात्मिकायै

स्वयम्भू भूपुष्पकरिण्यै

स्वयम्भू पुष्पमालिकायै

स्वयम्भू कुसुमन्यासायै

स्वयम्भू कुसुमप्रभायै

स्वयम्भू कुसुमज्ञानायै ९७०

स्वयम्भू पुष्पभोगिन्यै

स्वयम्भू कुसुमोल्लासायै

स्वयम्भू पुष्पवर्षिण्यै

स्वयम्भू कुसुमानन्दायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं स्वयम्भू पुष्पपुष्पिण्यै नमः
स्वयम्भू कुसुमोत्साहायै
स्वयम्भू पुष्परूपिण्यै
स्वयम्भू कुसुमोन्मादायै
स्वयम्भू पुष्पसुन्दर्यै
स्वयम्भू कुसुमाराध्यायै ९८०
स्वयम्भू कुसुमोद्भवायै
स्वयम्भू कुसुमव्यग्रायै
स्वयम्भू पुष्पपूर्णितायै
स्वयम्भूपूजकप्राज्ञायै
स्वयम्भूहोत्रिमात्रिकायै
स्वयम्भूदातृरक्षित्र्यै
स्वयम्भू भक्तभाविकायै
स्वयम्भू कुसुमप्रीतायै
स्वयम्भू पूजकप्रियायै
स्वयम्भू वन्दकाधारायै ९९०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्वयम्भू निन्दकान्तकायै
स्वयम्भूप्रदसर्वस्वायै
स्वयम्भूप्रदपुत्रिण्यै
स्वयम्भूप्रदसस्मेरायै
स्वयम्भूतशरीरिण्यै
सर्वलोकोद्भवप्रीतायै
सर्वलोकोद्भवात्मिकायै
सर्वकालोद्भवोद्भावायै
कुण्डपुष्पसमप्रीत्यै

कुण्डपुष्पसमरत्यै १०००
कुण्डगोलोद्भवप्रीतायै
कुण्डगोलोद्भवात्मिकायै
स्वयम्भुवे
शिवायै
शक्तायै
पाविन्यै
लोकपाविन्यै
कीर्त्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं यशस्विन्यै नमः

मेधायै

विमेधायै

सुरसुन्दर्यै

अश्विन्यै

कृत्तिकायै

पुष्यायै

तेजस्विन्यै

१०१०

ओं चन्द्रमण्डलायै नमः

सूक्ष्मायै

सूक्ष्मप्रदायै

सूक्ष्मासूक्ष्मभयविनाशिन्यै

वरदायै

भयदायै

मुक्तिबन्धविनाशिन्यै

कामुकायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कामदायै

क्षांतायै

कामाख्यायै

कुलसुन्दर्यै

सुखदायै

दुःखदायै १०३०

मोक्षायै

मोक्षदार्थप्रकाशिन्यै

दुष्टादुष्टमत्यै

सर्वकार्यविनाशिन्यै

शुक्रालयायै

शुक्रभोगायै

शुक्रपूजासदारत्यै

शुक्रपूज्यायै

शुक्रहोमसंतुष्टायै

शुक्रवत्सलायै १०४०

शुक्रमूर्त्यै

शुक्रदेहायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं शुक्रपूजकपुत्रिण्यै नमः
शुक्रस्थायै
शुक्रिण्यै
शुक्रसंस्कृतायै
शुक्रसुन्दर्यै
शुक्रस्नातायै
शुक्रकर्यै
शुक्रसेव्यायै

ओं अतिशुक्रिण्यै नमः
महाशुक्रायै
शुक्रभवायै
शुक्रवृष्टिविधायिन्यै
शुक्राभिधेयायै
शुक्रार्हायै
शुक्रवन्दकवन्दितायै
शुक्रानन्दकर्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शुक्रसदानन्दविधायिन्यै

शुक्रोत्साहायै १०६०

शुक्रपूर्णायै

शुक्रमनोरमायै

शुक्रपूजकसर्वस्वायै

शुक्रनिन्दकनाशिन्यै

शुक्रात्मिकायै

शुक्रसम्पदे

शुक्राकर्षणकारिण्यै

रक्ताशयायै

रक्तभोगायै

रक्तपूजासदारत्यै १०७०

रक्तपूज्यायै

रक्तहोमायै

रक्तस्थायै

रक्तवत्सलायै

रक्तपूर्णायै

रक्तदेहायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं रक्तपूजकपुत्रिण्यै नमः
रक्ताख्यायै
रक्तिन्यै
रक्तसंस्कृतायै १०८०
रक्तसुन्दर्यै
रक्ताभिदेहायै
रक्तार्हायै
रक्तवन्दनवन्दितायै

ओं महारक्तायै नमः
रक्तभवायै
रक्तवृष्टिविधायिन्यै
रक्तस्नातायै
रक्तप्रीतायै १०९०
रक्तसेव्यायै
अतिरक्तिन्यै
रक्तानन्दकर्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रक्तसदानन्दविधायिन्यै
रक्तारक्तायै
रक्तपूर्णायै
रक्तसेव्यक्षणरिमायै
रक्तसेवकसर्वस्वायै
रक्तनिन्दकनाशिन्यै
रक्तात्मिकायै
रक्तरूपायै ११००
रक्ताकर्षणकारिण्यै
रक्तोत्साहायै
रक्तव्यग्रायै
रक्तपानपरायणायै
शोणितानन्दजनन्यै
कल्लोलस्निग्धरूपिण्यै
साधकान्तर्गतायै
देव्यै
पाविन्यै
पापनाशिन्यै १११०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं साधूनांहृदिसंस्थात्र्यै नमः
साधकानन्दकारिण्यै
साधकानाञ्चजनन्यै
साधकप्रियकारिण्यै
साधकप्रचुरानन्दसंपत्तिसुखदा-
साधकासाधकप्राणायै [यिन्यै
साधकासक्तमानसायै
साधकोत्तमसर्वस्वायै

ओं साधकायै नमः
भक्तरक्तपायै ११२०
साधकानन्दसन्तोषायै
साधकारिविनाशिन्यै
आत्मविद्यायै
ब्रह्मविद्यायै
परब्रह्मकुटुम्बिन्यै
त्रिकूटस्थायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पञ्चकूटायै
सर्वकूटशरीरिण्यै

ॐ सर्ववर्णमयवर्णजपमालाविधा-
यिन्यै नमः

श्रीकालिकासहस्रनामावलिः

समाप्ता ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA